B.A./6th Sem (H)/SANS/23(CBCS)

# 2023

## 6th Semester Examination

## SANSKRIT (Honours)

### Paper : DSE 4-T

[CBCS]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

### [Fundamentals of Ayurveda]

1. अधोलिखितेषु प्रश्नेषु यथेच्छं संस्कृतभाषया देवनागरीलिप्या च पूर्णवाक्येन दशप्रश्नाः समाधेयाः — 2×10=20

(क) 'आयुर्वेदः' इत्यस्य शब्दस्य का व्युत्पत्तिः? 'आयुः' इत्यस्य पदस्य कोऽर्थः?

(ख) 'आयुर्वेदः' कस्य वेदस्य उपाङ्गमस्ति? वेदानुसार शास्त्रस्यास्य स्रष्टा को भवति?

(ग) 'अष्टाङ्गायुर्वेदः' इत्यत्र अष्टौ अङ्गानि कानि सन्ति?

(घ) सुश्रुतसंहितायाः कियन्तः भागाः सन्ति? के च ते?

(ङ) आयुर्वेदशास्त्रे कतिविधानि कर्माणि वर्णितानि सन्ति? कानि च तानि?

P.T.O.

(च) आचार्यवाग्भट्टेन विरचितौ प्रसिद्धौ ग्रन्थौ कौ स्तः ?

(छ) चरकाचार्यानुसारं विसर्गकालः को भवति ?

(ज) 'तस्याशिताद्यादाहाराद्' — इत्यनुसारम् आहारात् किं बर्धते ?

(झ) 'कायाग्निं बाधते रोगस्ततः प्रकुरुते बहून्' — इत्यत्र कः कालः वर्णितः ? तस्मिन्काले आहारे किञ्च वर्जनीयम् ?

(ञ) 'हंसोदकमिति ख्यातम्' — इत्यत्र किमर्थं कस्य कालस्य विशेषणमस्ति हंसोदकम् ?

(ट) 'इत्युक्तमृतुसात्म्यम्' इति वचनांशे 'ऋतुसात्म्यम्' किम् ?

(ठ) तैत्तिरीयोपनिषदः उत्सः को भवति ? अस्यामुपनिषदि कियन्तः विभागाः ? के च ते ?

(ड) 'भृगुर्वै वारुणिः' इति मन्त्रांशे वारुणिः को भवति ?

(ढ) 'पितरमुपससार' इति मन्त्रांशे कः कं प्रति किमुपससार ?

(ण) ब्रह्मोपलब्धेःकति द्वाराणि ? कानि च तानि ?

2. अधोलिखितेषु प्रश्नेषु यथेप्सितानां चतुर्णां प्रश्नानामुत्तरं प्रदेयम् (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागरीलिप्या च प्रदेयम्) — 5×4=20

(क) आयुर्वेदस्योद्देश्यं संक्षेपेण आलोच्यताम्।

(ख) कस्यापि एकस्य परिचयः प्रदेयः —

(i) भावमिश्रः।

(ii) माधवनिदानम्।

(ग) मानवीयसुस्वास्थ्यसंरक्षणे संयमे च वसन्त-ऋतोः माहात्म्यमुपस्थाप्यताम्।

(घ) अधोलिखितेषु कस्यापि एकस्य टीका रचनीया —

(i) आदानकालः।

(ii) ग्रीष्मकालः।

(ङ) प्रसङ्गेन सह व्याख्या कार्या — 'अन्नं ब्रह्मेति व्यजानात्'।

(च) भृगुं प्रति वरुणस्य द्वितीयोपदेशः क आसीत्? उपदेशस्यास्य माहात्म्यं समासेनोपस्थाप्यताम्।

3. अधोलिखितेषु प्रश्नेषु यथेच्छं द्वयोः प्रश्नयोः उत्तरं प्रदेयम् — 10×2=20

(क) अयुर्वेदशास्त्रस्योद्भवः क्रमविकाशश्च समासेनालोच्यताम्।

(ख) चरकः क आसीत्? भारतीयचिकित्साव्यवस्थायां चरकाचार्यस्य भूमिका समासेन प्रतिपादनीया।

(ग) 'पुनर्हेमन्तान्तान् दक्षिणायनं विसर्गञ्च' — कस्मिन् प्रसङ्गे इयमुक्तिः? कालेऽस्मिन् विहितस्य मानवीयजीवनयापन-विषयकः परामर्शः समासेन परिस्फुटनीयः।

(घ) 'प्राणो ब्रह्मेति व्यजानात्' इति मन्त्रांशानुसारं ब्रह्मणः स्वरूपं वर्णयत।

---

P.T.O.

**OR**

**[Environmental Awareness in Sanskrit Literature]**

1. अधोनिर्दिष्टेषु यथेच्छं दश प्रश्नाः समाधेयाः संस्कृतभाषया देवनागरीलिप्या च। 2×10=20

(क) पर्यावरणम् नाम किम्?

(ख) प्रवृत्तेः पञ्च मौलोपादानानि कानि?

(ग) अण्डजाः जीवाः के?

(घ) 'जीवो जीवस्य भक्षणम्' — इति वाक्यं कुत्र उपलभ्यते?

(ङ) लोकत्रयम् किम्? नामतः उल्लिख्यताम्।

(च) किम् नाम 'वास्तुशास्त्रम्'?

(छ) वायुमण्डलस्य के स्तराः सन्ति? नामानि लिख्यन्ताम्।

(ज) आचाराध्यायस्य कति प्रकरणानि सन्ति? तानि लिखन्तु?

(झ) वायुः इव प्रवहन्ति के?

(ञ) वैदिकयुगे कति स्त्रीदेवताः आसन्? तासां नामानि लिखन्तु?

(ट) अथर्ववेदस्य प्राचीनं नाम किम्?

(ठ) कः देवः पर्याप्तं जलराशिं सृजति?

(ड) 'सर्वं खल्विदं व्रह्मं तज्जलानिति शान्त उपासीत — इदं वाक्यं कुत्र उपलभ्यते?

(ढ) के पाञ्चभौतिका: ? तेषां नामानि लिखन्तु ?

(ण) वृहद्देवताया: रचनाकार: क: ?

2. अधोनिर्दिष्टेषु यथेच्छं **चत्वार:** प्रश्ना: समाधेया: (एकस्य प्रश्नस्य उत्तरमवश्यमेव सुरगिरा देवनागर्या च प्रदेयम्)।

5×4=20

(क) जलस्य भिन्नानि प्रकरणानि स्रोतांसि च वर्णयतु।

(ख) कौटिलीयस्य अर्थशास्त्रस्य परिवेशचिन्ताया: रूपरेखां वर्णयतु।

(ग) परिवेशसंरक्षणस्य उपायं लिखन्तु।

(घ) **एकस्य** टीका कार्या — परिवेश:, वास्तुतन्त्रम्।

(ङ) अभिज्ञानशकुन्तल-नाटकानुसारेण प्रकृतिचित्रं वर्णयतु।

(च) पृथिवीसूक्तस्य पर्यावरणीयं महत्त्वं किम् ?

3. अधोनिर्दिष्टेषु कयोश्चिद् **द्वयो:** प्रश्नयो: उत्तरं प्रदेयम् —

10×2=20

(क) पौराणिकसाहित्ये पर्यावरणस्य परिस्थितिम् आलोचयतु।

(ख) भारतीय-समाजजीवने रामायणस्य प्रभाव: वर्णनीय:।

(ग) मेघदूतकाव्ये पूर्वमेघस्य यात्रापथं वर्णयतु।

(घ) शुक्रनीत्यनुसारेण समाजनीते: परिचयं ददातु।

---